(यथा श्रुतौ। "अयज्ञिया वै कोद्रवाः"॥) अपि च।
"कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः।
कोद्रवो वातलो ग्राही हिमः पित्तकफापहः।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्"॥
इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। व्रणिनां पथ्यकारकत्वम्। कफपित्तहरत्वम्। रूक्षत्वम्। मोहकारित्वम् नूतनस्य तु गुरुत्वञ्च। इति राजनिर्घण्टः॥ परमग्राहित्वम्। वातलत्वम्। इति राजवल्लभः॥

कोपः, पुं, (कुप्यते इति। कुप्+भावे घञ्।) क्रोधः। इत्यमरः। १। ७। २६॥ (यथा, विष्णुपुराणे १। ११। १२।
"वत्स! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति"॥)

कोपक्रमं, क्ली, (उपक्रम्यते आरभ्यते यत् तत् उपक्रमं सृष्ट्यादिकम्। उप+क्रम्+कर्म्मणि घञ्। कस्य ब्रह्मणः उपक्रमं सृष्टिः।) ब्रह्मणः सृष्टिः। इत्यमरटीकायां रायमुकुटः॥ (कोपेन क्रम्यते इति। यद्वा, कोपस्य क्रमः उद्योगोऽस्य।) कोपयुक्ते, त्रि॥

कोपनः, त्रि, (कुप्+युच्।) कोपविशिष्टः। इति जटाधरः॥ (यथा, महाभारते १। २९। १६।
"आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम्"॥
पुं, बलिवंशीयः कोपनो नामासुरः।
यथा, हरिवंशे। ४१। ८४।
"शरभः शलभश्चैव कुपनः कोपनः क्रथः"॥
क्ली, कुप्+णिच् भावे ल्युट्। दोषविकारकारकव्यापारविशेषकोपनिष्पादनम्। यथा, महाभारते अनुगीतायाम्। १४। १७। १३।
"स्वदोषकोपनाद्रोगं लभते मरणान्तिकम्।
अपि चोद्बन्धनादीनि परीतानि व्यवस्यति"॥)

कोपनकः, पुं, (कोपनः कोपशील इव कायति प्रकाशते। कै+कः।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कोपना, स्त्री, (कुप्यतीति। कुप्+ताच्छील्ये युच्+टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २। इत्यमरः। २। ६। ४॥ चण्डी ३। इति जटाधरः॥ भीमा ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ३। ८।
"कयासि कामिन् सुरतापराधात्
पादानतः कोपनयावधूतः।
तस्याः करिष्यामि दृढ़ानुतापं
प्रवालशय्याशरणं शरीरम्"॥)

कोपलता, स्त्री, (कोपहेतुर्लता।) कर्णस्फोटालता। इति राजनिर्घण्टः॥

कोपी, [न्] त्रि, 'अवश्यं कुप्यति इति आवश्यके णिनिः।) क्रोधनः। इत्यमरः। ३। १। ३२॥ (यथा, मार्कण्डेये २८। २९।
"सर्व्वसङ्गपरित्यागो ब्रह्मचर्य्यमकोपिता।
यतेन्द्रियत्वमावासे नैकस्मिन् वसतिश्चिरम्"॥)
जलपारावते, पुं,। इति राजनिर्घण्टः॥

कोमलं, क्ली, (कौति शब्दायते वाय्वादियोगेन स्रोतोवेगेन वा। कु शब्दे वृषादित्वात् कलच् तस्य मुट् च। बाहुलकात् गुणः।) जलम्। इति मेदिनी॥

कोमलः, त्रि, (कम् कान्तौ+बाहुलकात् कलच् अत उत्वं गुणश्च।) अकठिनः। नरम इति भाषा। तत्पर्य्यायः। सुकुमारः २ मृदुलः ३ मृदुः ४। इत्यमरः। ३। १। ७८। पेलवः ५। इति जटाधरः॥ मनोज्ञः। इति शब्दरत्नावली॥ (यथा, रघुः। ९। ३५।
"श्रुतिसुखभ्रमरस्वनगीतयः
कुसुमकोमलदन्तरुचो बभुः।
उपवनान्तलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः"॥)

कोमलकं, क्ली, (कोमल+संज्ञायां कन्।) मृणालम्। इति शब्दचन्द्रिका॥ (स्वार्थे कन्। जलम्॥)

कोमला, स्त्री, (कोमल+स्त्रियां टाप्।) चौरिका। इति शब्दचन्द्रिका॥ (वृत्त्यनुप्रासघटकवृत्तिभेदः। चौरिकाशब्देऽस्य विवरणं ज्ञेयम्॥)

कोमासिका, स्त्री, (कु ईषत् उमा अतसीवृक्षः स इव आस्ते। आस्+ण्वुल्+टाप् अत इत्वम्। कोः कादेशः।) जालिका। इति हारावली॥ फलेर जालि इति भाषा॥

कोयष्टिः, पुं, (कं जलं यष्टिरिवास्य पृषोदरात् अत उत्वे गुणत्वे च साधुः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ५। १२।
"प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्"॥)

कोयष्टिकः, पुं, (कोयष्टि+संज्ञायां कन्।) पक्षिभेदः। कोँड़ापक्षी इति भाषा। इत्यमरः। २। ५। ३५॥

कोरकः, पुं, (कुर संस्थाने+कर्त्तरि ण्वुल्। अस्य रत्वम्।) कलिका। इत्यमरः। २। ४। १६॥ ("कलिका कोरकः पुमान्" इत्यमरवाक्यं प्रायिकाभिप्रायेण इति बोध्यम्। यतः "कोरकं कुड्मलेऽपि स्यात् कक्कोलकमृणालयोरिति" "कोरकोऽस्त्री कुड्मले स्यादिति" च विश्वमेदिनीकाराभ्यामुक्तम्॥)

कोरकः, पुं क्ली, (कुर्+ण्वुल्। अस्य रः।) मुकुलम्। (यथा, माघे। ७। २६।
"मदवनिरुद्धां रजोवधूभ्यः
समुपहरन् विचकार कोरकाणि"॥)
कक्कोलकम्। मृणालम्। इति मेदिनी॥ चोरनामगन्धद्रव्यम्। इति जटाधरः॥

कोरङ्गी, स्त्री, (कुरति कोरङ्गीत्याख्यां गच्छतीति कुर्+अङ्गच् गौरादित्वात् ङीष्।) सूक्ष्मैला। इत्यमरः। २। ४। १२५॥ (अस्याः पर्य्यायः यथा, "सूक्ष्मोपकुञ्चिका तुच्छा कोरङ्गी द्राविड़ी त्रुटिः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पिप्पली। इति राजनिर्घण्टः॥

कोरदूषः, पुं, (कोलं संस्थानं दूषयति। दूष्+णिच् "कर्म्मण्यण्"। ३। २। १। इत्यण्। अस्य रत्वम्।) कोद्रवः। इत्यमरः। २। ९। १६॥ (यथा, महाभारते। ३। १९०। १८—१९।
"ईदृशो भविता लोको युगान्ते पर्य्युपस्थिते।
वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषकः।
भार्य्यामित्राश्च पुरुषा भविष्यन्ति युगक्षये"॥
अस्य गुणा यथा,—
"स कोरदूषः श्यामाकः कषायमधुरो लघुः।
वातलः कफपित्तघ्नः शीतसंग्राहि शोषणः"॥
इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम्॥)

कोलं, क्ली, (कुल् अच् गौरादित्वात् ङीष्। कोली तस्याः फलमित्यण् तस्य लुक् "लुक्तद्धितलुकि"। १। २। ४९। इति ङीषो लुक्।) वदरीफलम्। तत्पर्य्यायः। कुवलम् २ फेनिलम् ३ सौवीरम् ४ वदरम् ५ घोण्टा ६। इत्यमरः। २। ४। ३६॥ पिच्छिलम् ७ स्वादुफलम् ८ वदरीफलम् ९। इति शब्दरत्नावली॥ कोकिलम् १०। इति जटाधरः॥ अपि च।
"पुंसि स्त्रियाञ्च कर्कन्धुर्वदरीकोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं वदरञ्च तत्॥
अजाप्रिया कुहा कोलिर्विषमो भयकण्टकः"॥
अथ वदरविशेषाणां लक्षणानि गुणाश्च।
"पच्यमानं सुमधुरं सौवीरं वदरं महत्।
सौवीरं वदरं शीतं भेदनं गुरु शुक्रलम्॥
वृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम्।
सौवीराल्लघु संपक्वं मधुरं कोलमुच्यते॥
कोलन्तु वदरं दाहि रुच्यमुष्णञ्च वातहृत्।
कफपित्तकरं चापि गुरु सारकमीरितम्॥
कर्कन्धुः क्षुद्रवदरं कथितं पूर्व्वसूरिभिः।
अम्लं स्यात् क्षुद्रवदरं कषायं मधुरं मनाक्॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं भेद्यग्निकृत् सर्व्वं लघु तृष्णाक्लमास्रजित्"॥
इति भावप्रकाशः॥ वदरादित्रयं शृगालकोलौ। वदरीसदृशा घोण्टा शृगालकोलिः। यदुक्तम्।
"वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत्।
अटव्यामेव सा घोण्टा गोपघोण्टेति चोच्यते"॥
इति सभूतिः॥
"हस्तिकोलिर्गोपघोण्टा घोण्टा च वदरीच्छदा।
शृगालकोलिः कर्कन्धुः" इति। रत्नकोषः॥ केचित्तु कोलादित्रयं वदरीफले सौवीरादित्रयं शृगालकोलावित्याहुः॥ स्वामी तु "कर्कन्धुर्वदरी कोलिर्घोण्टा कुवलफेनिलौ। सौवीरं वदरं कोलम्"॥ इति पठति। तत्राद्यास्त्रयो वृक्षार्थाः अन्ये फलार्था घोण्टा तूभयस्मिन्निति व्याचष्टे। "सौवीरं वदरं कोलं वदरीणां फलं मतम्"। इति कोषान्तरञ्च। इति भरतः॥ * ॥ अस्य गुणाः। अम्लत्वम्। वायुकफनाशित्वञ्च॥ पक्वस्यास्य गुणाः। वायुपित्तनाशित्वम्। स्निग्धत्वम्। सुमधुरत्वम्। सारकत्वञ्च॥ शुष्कस्यास्य गुणाः। कफवायुनाशित्वम्। पित्तविरोधित्वञ्च॥ पुरातनस्यास्य गुणाः। श्रमतृष्णानाशित्वम् स्निग्धत्वम्। लघुत्वञ्च॥ अस्य मज्जगुणाः। मधुरत्वम्। पित्तच्छर्दितृष्णानाशित्वञ्च। इति राजवल्लभः॥ * ॥ तोलकपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, चरके कल्पस्थाने १२ अः।
शाणौ द्वौ दंक्षणं विद्यात् कोलं वदरमेव च"॥) मरिचम्। इति राजनिर्घण्टः॥ चव्यम्। इति वैद्यकम्॥

कोलः, पुं, (कोलति कामपि बाधां न मत्वैव शत्रुं प्रतिधावतीति। कुल+अच्।) शूकरः। (कोलति श्रवते